# धर्मग्रन्थेषु मानवीयमूल्यानि

**डॉ. हरिप्रसादमीना**
**प्रशिक्षितस्नातक अध्यापकः, संस्कृतम्,**
**दिल्लीसर्वकारः, नवदेहली।**

**Article Info**
Volume 3, Issue 6
Page Number: 103-107

**Publication Issue :**
November-December-2020

**Article History**
Accepted : 10 Nov 2020
Published : 24 Nov 2020

**सारांशः** – नीतिशास्त्रादिद्वारा लोकोत्तरगुणानां विकासः कर्तव्यः तानि मूल्यानि भवन्ति, उत्तरदायित्वग्रहणम् आर्जवम्, स्त्रीषुमातृत्वभावना, परोपकारभावना, करुणा, त्यागः इत्यादीनि भवन्ति। भारतीयाणां नैतिकमूल्यानि समावर्तनसंस्कारसमये गुरो अन्तिमः उपदेशो भवति स्म। सत्यं वद्। धर्मं चर। स्वाध्यायात्मा प्रमदः। सत्यान प्रमदितव्यम्। धर्मान्न प्रमदीतव्यम्। भूत्यै न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव। अतिथि देवो भव। श्रद्धयादेयम् इमानि नैतिकानि मूल्यानि मानवव्यहारस्य मार्गदर्शकानि भवन्ति।

**मुख्यशब्द : –** धर्मग्रन्थः, मानवमूल्यम्, परोपकारभावना, करुणा, त्याग, कर्तव्यः,संस्कृत।

भारतीय धर्म ग्रन्थेषु मूल्यशब्दस्य प्रयोगः "शील" शब्दार्थे कृतोऽस्ति। शब्दोऽयं न मूल्यशब्दस्य पर्यायः अपितु तत्समवाची शब्दः। अस्य च आंङ्गलपदं भवति वैल्यू इति शब्दः लैटिन्भाषायाः इति शब्दात् उत्पन्नोऽस्ति। यस्य च अर्थं कस्य जन वस्तुनः मूल्यम्, गुणम्, विशेषताम्, उपयोगितां वा सूचयति। इदं मूल्यम् एतादृशी एका आचारसंहिता आहोस्वित् सद्गुणानां समूहः भवति। यत् मूल्यमाधारीकृत्यः व्यक्तिः व्यक्तिविकासं कर्तुं समर्था भवति। अत्र मानवस्य धारणा, विचारः, विश्वासः, मनोवृत्तिः तथा स्थितिः च समन्विताः भवन्ति। जीवने शीलमेव (मूल्यमेव) सद्गुणसाधनम्। यत्र शीलं तत्रैव धर्मः सत्यं तेजो बलं च निवसन्ति। नहि जगति किंचिदप्यसाध्यं शीलवताम्। सर्वेषां गुणानामाधारः शीलम्। शीलेन त्रिभूवनमपि जेतुं शक्यम्। महात्माबुद्धः शीलगुणस्य महत्व वर्णयति यत्–

**[1]चन्दनं तगरं वापि उत्पलम् अथ वस्सिकी।**
**एतेसं गन्धजातानां शीलगन्धो अनुत्तरो।।**

तथैव वदति भगवान् बादरायणः उक्तं च महाभारते–

**[2]शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः।**
**नहि किंचिद्साध्यं वै लोके शीलवतां भवेत्।।**
**श्रूयतां धर्म सर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

**श**ीलेन त्रिभुवनमपिः जेतुं शक्यम् अत्र मानवस्य धारणा विचार विश्वास मनोवृत्तिः तथा स्थितिः च समन्विताः भवन्ति। जीवनेन शीलमेव सद्गुणसाधनम्, यत्र शीलं तत्रैव धर्मं सत्यं तेजो बलं च निवसन्ति। नहि जगति किंचिदपि असाध्यं शीलवताम् इतिः।

उक्तं च–

**[3]येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।**

**ते मृत्युलोके भुवि भारभूताः, मनुष्य रूपेण मृगाश्चरन्ति।।**

जॉन जे काने महोदयाः वदन्ति यत् मानव–मूल्यानि आदर्श–सामाजिक सदस्याः उत समाजश्च स्वीजने अङ्गीकुर्वन्ति। पुरुषार्थचतुष्टये धर्मार्थकाममोक्षाः अन्तर्गच्छन्ति। तत्र यद्यपि अर्थकामयोः प्राधान्यं ऋषिभिः वर्णितम् अस्ति, तथापि सर्वोपरि धर्मस्य प्राधान्यम् अर्थात् आधुनिकदृष्ट्या जीवनमूल्यानां प्राधानं निर्दिष्टमेव। अत एव ''धर्मेण हीनौ अर्थकामौ परित्याज्यौ एव'' इति तेषां मतम् आसीत्। अर्थात् जीवनयापनाय भौतिकतायाः कामता वा त्याज्या एव इति प्राचीनानाम् आचार्याणां मतम्।

मूल्यम् इत्यस्य इत्थम् इति अर्थनिर्देशः कदाचित् न सम्भवति। कश्चित् यदेव मूल्यं मन्यते तदैव अपरस्मै मूल्यं न भवेत्। अतः मूल्यं प्रतिव्यक्ति तदीयं स्वभावम् आश्रित्य भिद्यते। परन्तु कानिचन् मूल्यानि सार्वभौमिकाणि सार्वकालिकानि वा भवन्ति। तेषां तु सम्प्रत्ययः अवश्यमेव स्पष्टयितव्यः। आधुनिकसामाजिक–परिप्रेक्ष्ये वैयक्तिमूल्यानां सामाजिकमूल्यानां च मध्ये संघर्षः दृश्यते। अत एव क्वचित् सामाजिकमूल्यानां विकासः क्वचित् वैयक्तिकमूल्यानां विकासः च अवलोक्यते। परन्तु वैयक्तिक–सामाजिक मूल्यानि परस्परं सम्बद्धानि वर्तन्ते। अयं भावः यदि स्पष्टो भवति तर्हि मूल्यानां संप्रत्ययः अपि स्पष्टो भविष्यति।

''नौवयोधर्म'' इत्यादि सूत्रेण मूलेन आनाभ्यं मूल्यं, मूलेन समं मूल्यं इति अर्थविशेषप्रदर्शिताः। वस्त्रादीनां वस्तूनाम् उत्पादने वणिग्भिः विनियुक्तं द्रव्यं मूलमिति, विक्रयणेन प्राप्तम् अतिरिक्तं द्रव्यं लाभाख्यं मूलमिति च कथ्यते। परन्तु लोके मूलस्य लाभस्य च संयोजनेन वस्तुनः मूल्यं निर्णीयन्ते। व्यवहारोऽयं निरूढलक्षणतया निरुद्यते। मनुष्यस्य ऐहितं जीवनं मूलश्चेत् आमुष्मिकं मूल्यं भजते। एव मूलशब्दस्य तात्पर्यम् उपयोगिता, वांच्छनीयता महत्वश्च। यस्मिन् समाजे योषामादर्शानां महत्वं भवति। यैः सामाजिकानां जनानां व्यवहारः निर्दिष्टः नियन्त्रितश्च भवति, ते आदर्शाः तस्य समाजस्य मूल्यानि भवन्ति। एषा सामान्य धारणा भवति परञ्च वास्तविकरूपेण शब्दस्य सर्वमान्या काऽपि अवधारणा नास्ति।

**मानवमूल्यानां प्रकृतिः–** मानव मूल्यानां प्रकृतिः विषये विचारिते सति तथ्यद्वयं समायाति। मूल्यानां व्यक्तेः व्यवहारं निर्दिष्टं नियन्त्रितश्च कुर्वन्ति। मूल्यानां सम्बन्धः व्यक्तिनां समाजस्य च आचारविचारेषु च भवति। कस्यापि समाजस्य आदर्शाः, सिद्धान्ताः, विश्वासाः, नैतिकनियामाः, सम्प्रदायाः मानदण्डाश्च अनेके भवन्ति। परन्तु सामाजिकः तेषु केषाचिंत अधिकं महत्वं भवति अन्येषां ततोऽपि न्युनं महत्वंच प्रयच्छति। यः यस्य अधिकं महत्वं प्रयच्छति। सः तस्य कृते शक्तं मूल्यं भविष्यति।

समाजस्य विश्वासाः, आदर्शः, सिद्धान्ताः, नैतिकनियमाः सम्प्रदायाः मानदण्डाश्च कथं सम्भवति इति ईषत् विचार्यते। ऐतेषां निर्माणं विकासो वा एकस्मिन् दिने न सम्भवति। एते मनुष्याणां दीर्घानुभवस्य परिणामाः भवन्ति तथैव एतेषु परिवर्तनमपि सम्भवति। अतः एव निश्चेतु शक्यते यत् मूल्यानि मनुष्याणां दीर्घकालस्य अनुभवस्य परिणामानि भवन्ति तथा तानि परिवर्तनशीलान्यपि भवन्ति। पुनश्च एतानि मूल्यानि तस्य समाजस्य संस्कृतेश्च प्रत्यभिज्ञाचिहानि भवन्ति, समाजः एतानि महता प्रयत्नेन संरक्षति।

मूल्यम् इति अमूर्तसम्प्रत्ययः वर्तते। मूल्यं कस्यापि समाजस्य विश्वासानाम् आदर्शानां सिद्धान्तानां नैतिकनियमानां समाजनिर्धारिताः मानदण्डाः भवन्ति। विभिन्नसमाजानां संस्कृतिधम्रराष्ट्रांच मूल्यानि भिन्नानि भवन्ति। मूल्यानां कारणात् तेषाम् अस्तित्वं भवति। व्यक्तिः समाजस्य रक्षार्थं राष्ट्रस्यरक्षार्थं स्वीयमूल्यानां रक्षणं करोति। व्यक्तेः व्यवहारः तस्य मूल्यानि निर्दिशति।

**मूल्यानां वर्गीकरणम्:–** मानवीयव्यक्तित्वस्य निर्माणाय तदीय जीवनशैलीनां परिचयाय मनुष्याणां विचारमनोवृत्ति आसक्ति श्रद्धादि प्रणीतानि अनेकानि मूल्यानि भवन्ति। यत् बहुजनहिताय बहुजनसुखाय भवति तदेवाचरणीयां इति मूल्यमापनदण्डोऽस्ति। तदनुसारं स्वच्छता त्यागः दयाः प्रियभाषणं सत्यं कथनं भ्रातृत्वं सहयोगः इत्यादि सद्गुणाः जीवनशोभाकराः इति सन्दृश्यते।

**परम्परागतमूल्यम्:–** संस्कृत साहित्ये परम्परागतमूल्यं तु चतुर्वर्गफलप्राप्तिरेव। पुरूषेण जीवने साधनीयमिति कृत्वा एव पुरुषार्थः इति कथ्यते। पुरुषार्थः चतुर्धाः वर्तते, धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहताः इति अग्निपुराणे पुरुषार्थानाम् अभिप्रयोऽस्ति।

**धर्मः :–** मानवानां कर्तव्यं यथाविधि पालनं, नैतिकविचारानुसारं जीवनयापनं तपः, स्वाध्यायः, इन्द्रियनिग्रहः इत्यादि पवित्र विचाराः अत्र भवन्ति। ''धारणात् धर्ममित्याहुः'' इति स्वकर्तव्यानां विश्वासः तादृशधर्माचरणं कृत्वा प्रथमं पुरुषार्थमाप्नोति अथवा जन्मसार्थक्यं भजते। उक्त :–

**[4]धारणाद् धर्ममित्याहुः धर्मेण विधृता प्रजाः।**

**य स्यात् धारणः संयुक्त स धर्मः इति निश्चयः।।**

**अर्थः :–** सन्मार्गे वित्तार्जनं, यथोचितसुखोपभोगः स्वस्थ च उदरभरणाय क्रियमाणः प्रयासः। सामाजिकवातावरणे सुखं प्राप्य जन्मनः सार्थकं भजते। उक्तं चः–

**[5]धर्मस्य ह्यापवर्गस्य नार्थोऽर्थायोकल्पते।**

**नार्थस्य धर्मेकान्तस्य कामो लाभाय हि स्मृताः।।**

**कामः :–** आसुरीं वृत्ति परित्यज्य, यथोचितसुखोपभोगः, आनन्दानुभूतिर्वाकामः कथ्यते। ते मनः शरीरं पारिवारिकं जीवनं, सामाजिकं जीवनं च सुखमयं भवति। तस्मात् आनन्दोपभोगार्थं कलात्मकं जीवनं च प्राप्तव्यम्।

**मोक्षः :–** पूर्णत्वप्राप्ति, धर्मस्य परमफलं मुक्तिरेव अस्यायमर्थः वर्तते यत् अतीन्द्रियदृष्ट्या आत्मनः अवलोकनं आत्मसाक्षात्कारेण परमात्मना सह अद्वैतसिद्धिः सायुज्यं वा सांसारिकबन्धनात् मुक्तिरिति कथ्यते।

**[6]मनयेव मनुष्याणां कारणं बन्ध मोक्षयोः।**

**बन्धाय विशयासक्तं मुक्त्यै निर्विषयं स्मृतम्।।**

**मनस्यशान्तिरेवश्यात् मानवानां विशेषतः।**

**शिवं चैव शुभम् भूयात् लौकिके परलौकिके।।**

यद्यपि पुरुषार्थाः चत्वारः सन्ति। तथाऽपि च तुरीयः पुरुषार्थः सर्वेः जीवने साधयितुं शक्यते इति वक्तुं न प्रभवामः। तस्मात् धर्मार्थकामनां पुरुषार्थानां प्राधान्येन सेवन कर्तव्यमिति प्राचीनानां विचारः, पुरुषार्थनां धर्मस्य प्रथमपर्यायः अर्थस्य द्वितीपर्यायः कामस्य तृतीयः पर्यायः इत्येवं दैनिकक्रियायामानेतव्यमिति प्राचां विशिष्टं सिद्धान्तः तथा हि–

**[7]धर्मं पूर्वे धनं मध्ये जघन्ये काममाचरेत्।**

**अहन्यनुचरेदेवम् एष शास्त्रकृतो विधिः।।**

**तमसोलक्षणं कामः राजस्त्वर्थम् उच्यते।**

**सत्वस्य लक्षणं धर्मः श्रेष्ठयमेषां यथोन्तरम्।।**

इत्थं पुरुषार्थचतुष्टयं परम्परिकमूल्यत्वेनाङ्गीकृतम्। आचार्यगोस्वामिमते तु ईश्वरभक्तिः पंचमपुरुषार्थः स च पुरुषार्थः प्रधानश्च दृश्यते। उक्तं चः–

**[8]दैवं पुरुषकारेण को वञ्चयितुर्महति।**

**दैवमेव परं मन्ये पुरुषार्थो निरर्थकः।।**

एतेषां मूल्यानां प्राप्तये वैयक्तिकं सामाजिकं जीवनं संघटितम्। ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्यासाख्येषु आश्रमेषु क्रमशः जीवनयात्रां कुर्वन् वैयक्तिकं जीवनं मूल्यानां प्राप्त्तये व्याप्नोति। तथैव चातुर्वण्यव्यवस्थया सामाजिकं जीवनं यापनमृ मूल्यानि प्राप्नोति इति तेषां निर्णयः। तदस्मात् भारतीयसमाजः धर्मप्रधान समाजः आध्यात्मिक मूल्यकेन्द्रितश्च दरीदृश्यते।

शाश्वतमूल्यम् :– एतन्मूल्यं सनातनधर्मः इति कथ्यते। एतच्च देशकालावस्थाजातिवर्णलिंगादिविशेषेण परिवर्तितं न भवति। मनोवांछायकर्मभिः आन्तरिकसत्यसंरक्षार्थं कृत आचारः इति वक्तुं शक्यते। तदैव भगवद्गीतायां महात्मनां स्वरूपत्वेन वर्णितं दृश्यते यत्–

**[9]मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।**

**मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम्।।**

यत् सनातनधर्मः शश्वतोऽस्ति, ततः तद्धर्मपालनाय नागरिकाः प्रेरिताः भवन्ति। अत्र लज्जा मोहः दम्भः इत्यादिकं बाधकं न भवति। यत्सत्वगूणसम्पन्नं शाश्वतमूल्यं तदेव मनूष्येव आचर्यते :–

**[10]यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरम्।**

**येन तुष्यति चात्मास्य तत्सत्सवगुणलक्षणम्।।**

एतदेव शाश्वतमूलस्यावाप्तये आत्मपरिशीलनं काम्यते इतिस्मृतिकारे बहुधोपदिष्टम् :–

**[11]यथेवात्मा परस्तद्वत द्रष्टव्यः शुभमिच्छता।**

**सुखदुःखानि तुल्यानि यथात्मनि तथापरे।।**

**श्रुयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**

**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

विचार्य यत् शाश्वतं सत्यं तदन्विष्य तदनुसरणाय जीवनयापनशैलीः श्रेयसी, तत्र विद्यमानं मूल्यमेव शाश्वतमूल्यमिति कथयितुं शक्नुमः। एतानि मूल्यानि वृद्धानां, मातपित्रोः, गुरुजनानां सम्पर्केण ज्ञाताऽज्ञातरूपेण बालकेषु संक्रमितानि भवन्ति। उक्तं चः–

**[12]यद्यदाचरति श्रेष्ठः तत्देवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।**

**नैतिकमूल्यम् :–** नीतिशास्त्रादिद्वारा लोकोत्तरगुणानां विकासः कर्तव्यः तानि मूल्यानि भवन्ति, उत्तरदायित्वग्रहणम् आर्जवम्, स्त्रीषुमातृत्वभावना, परोपकारभावना, करुणा, त्यागः इत्यादीनि भवन्ति। भारतीयाणां नैतिकमूल्यानि समावर्तनसंस्कारसमये गुरो अन्तिमः उपदेशो भवति स्म। सत्यं वद्। धर्मं चर। स्वाध्यायात्मा प्रमदः। सत्यान प्रमदितव्यम्। धर्मान्न प्रमदीतव्यम्। भूत्यै न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव। अतिथि देवो भव। श्रद्धयादेयम् इमानि नैतिकानि मूल्यानि मानवव्यहारस्य मार्गदर्शकानि भवन्ति। तद्यथा

**[13]अभिवादनशीलस्य नित्यं वृद्धोपसेविनः**

**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।**

उक्तं च

**[14]व्यव्यस्तपाणिना कार्यमुसंग्रहणं गुरोः।**

**सव्येन सव्यः स्पष्टव्यो दक्षिणेन च दक्षिणः।।**

विस्तृतरूपेण सदाचारेण श्रेष्ठामानवमूल्यानि अस्ति।

**[15]एतद्देशंप्रसूतस्य सकाशादग्रजन्मनः**

**स्वं स्वं चरित्रं शिक्षरेन् पृथिव्याः सर्वमानवाः।।**

## सन्दर्भसूची

1. धम्मपदम् 4.12
2. महाभारतम् 1.98.12
3. नीतिसंग्रहम् 26
4:– महाभारतशान्तिपर्व 109–11
5:– श्रीमद्भागवतम् 1–6.18
6:– सूक्तिसंग्रहः पृ0सं0 16
7:– श्रीमद्भागवतम् 6–4–12
8:– श्रीमद्भागवतम् 2.4.12
9:– हितोपदेशमित्रलाभः 100
10:– मनुस्मृतिः
11:– सूक्तिसंग्रहः पृ0सं0 12
12:– श्रीमद्भगवतगीतायां 3.21
13:– मनुस्मृतिः 2–121
14:– मनुस्मृतिः 3–129
15:– मनुस्मृतिः 2–20